वर्तमानसमाजे प्राचीनधर्मशास्त्रनिरूपितदायभागस्य प्रासङ्गिकत्वम्

ड. अञ्जनदासः

शोधसारः- वर्तमानभारतीयसमाजोऽतीव स्वार्थकेन्द्रिकः। अस्मिन् समाजे विभिन्नविषये मानवानां मध्ये हिंसा भवति मतपार्थक्यात्। तदर्थं सर्वकारेण विविधविधिः प्रचलितः। तत्र दायभागविषये हिन्दूनां कृतेऽपि अर्वाचीनहिन्दुविधिः प्रतिपादितः। तत्र प्रामाणिकधर्मशास्त्रस्य समयानुसारेण परिवर्तनं परिमार्जनं कृतम्। फलतः पारिवारिकसंहतिः, परस्परयोर्मध्ये ऐक्यभावः इत्यादयः विनष्टाः। कथं विनष्टः, ततः मुक्तेरुपायः अस्मिन् शोधनिबन्धे मया प्रतिपादितः सयुक्त्या। किञ्चात्र अर्वाचीनहिन्दुविधिना सह धर्मशास्त्रस्य पार्थक्यमपि निर्दिष्टमिति।

कूटशब्दाः- आचारः, व्यवहारः, प्रायश्चित्तः, दायः, स्त्रीधनम्, आधुनिकविधिः

धर्मशास्त्रं हि भारतवर्षस्य प्राचीनतमं प्रामाणिकं शास्त्रम्। अस्य शास्त्रस्य नामान्तरं हि स्मृतिरिति। वस्तुतः शास्त्रेऽस्मिन् न केवलं धर्माधर्मविषये विचारो दृश्यते। अपि तु समाजे प्रचलनार्थं येषां येषामुपादानानामावश्यकता वर्तते प्रायः तेषां तेषां विषयाणामालोचनमत्र विहितम्। तथा चा धर्मशात्रे प्राधान्येन त्रयो मुख्यविषया निरूपिता महर्षिभिः- आचारः, व्यवहारः, प्रायश्चित्तञ्चेति। विज्ञानेश्वरादिभिः भाष्यकारैरपि कृत्स्नं धर्मशास्त्रं षोढा विभज्य त्रिषु अध्यायेषु हि तेषामन्तर्भावः कृतः। यथा आचाराध्याये वर्णधर्म-आश्रमधर्म-वर्णाश्रमधर्म-साधारणधर्माणामालोचना विहिता, व्यवहाराध्याये शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनादिरूपो गुणधर्मः आलोचितः, प्रायश्चित्ताध्याये च विहिताकरणप्रतिषिद्धसेवनरूपस्य निमित्तधर्मः स्वीकृतः। अत्र च षड्विधेषु स्मार्तधर्मेषु गुणधर्मोऽन्यतमः। गुणधर्मे आलोचितविषयः दुष्टनिग्रहमन्तरेण न सम्भवति। दुष्टपरिज्ञानञ्च न व्यवहारदर्शनमन्तरेण सम्भवति। ननु अत्र व्यवहारशब्दस्य कोऽर्थ इति जिज्ञासायामुच्यते 'वि'उपसर्गात् 'अव'उपसर्गाच्च 'हृ'धातोः 'घञ्'प्रत्यये व्यवहारशब्दो निष्पन्नः। ततश्च तस्यार्थो भवति-

"विनानार्थेऽवसन्देहे हरणं हार उच्यते।
नानासन्देहहरणाद्व्यवहार इति स्मृतः॥"[1] इति।

वस्तुतः धर्मशास्त्रसमाचारविरुद्धेन मार्गेण परैरभिभूतो यद्राज्ञे प्राड्-विवाकाय वा विज्ञापयति तदेव व्यवहारपदवाच्यं भवतीति योगीवरयाज्ञवल्क्यमतम्-

"स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्॥"[२] इति।

स च व्यवहारो भाषा-उत्तर-क्रिया-साध्यसिद्धिभेदेन पादचतुष्टयात्मकः। किञ्च प्रतिज्ञा-उत्तर-संशय-हेतु-परामर्श-प्रमाण-निर्णयप्रयोजनात्मको भवति व्यवहारः तस्य पदं विषयः व्यवहारपदमित्युच्यते, स च द्विविधः- शंकाभियोगः तत्त्वाभियोगश्चेति। पुनश्चायम् अष्टादशधा भिद्यते ऋणादान-निक्षेप-अस्वामिविक्रय-सम्भूयसमुत्थान-दत्तानपकर्म-वेतनादान-संविद्व्यतिक्रम-क्रयविक्रयानुशय-स्वामिपालविवाद-सीमाविवाद-वाक्पारुष्य-दण्डपारुष्य-स्तेय-साहस-स्त्रीसंग्रहण-स्त्रीपुंधर्म-दायभाग-द्युतसमाह्वयभेदेनेति। तदुक्तं भगवता मनुना-

"तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः।
संभूय च समुत्थानं दत्तस्यानपकर्म च॥
वेतनस्यैव चादानं संविदश्च व्यतिक्रमः।
क्रयविक्रयानुशयो विवादः स्वामिपालयोः॥
सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके।
स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव ॥॥
स्त्रीपुंधर्मो विभागश्च द्युतमाह्वय एव च।
पदान्यष्टादशैतानि व्यवहारस्थिताविह॥"[३] इति।

अत एव दृश्यते धर्मशास्त्रे विचारितेषु अष्टादशव्यवहारपदेषु दायभागोऽतीव विशिष्टं स्थानमलंकरोति। 'विभक्तव्यं पितृद्रव्यं दायमाहुर्मनीषिणः' इति निघण्टुवचनात् दायस्तावत् पैतृकधनम् अर्थात् पैतृकधनं दाय इति पदेनोच्यते। व्युत्पत्त्यनुसारं दा-धातोः घञ्प्रत्यये दाय इति, ल्युट्प्रत्यये दानं चेति निष्पद्यते। दीयते इति व्युत्पत्त्या दायरूपेण पितृधनं पुत्रा नैव गृह्णन्ति। अर्थात् स्वर्गगामी पिता पुत्राय स्वधनं न ददाति। तत्रापि दीर्घरोगग्रस्तो पिता पुत्रेभ्यः स्वधनं दातुं न समर्थो भवति। अत एव दीयते इति व्युत्पत्त्या दायशब्दस्य यः प्रयोगः स गौणः। प्रसङ्गेऽस्मिन् जीमूतवाहनेन कथितम् 'मृतादीनां स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्त्वस्वरूपकफलसाम्यात् मृतादीनां तत्र त्यागो नास्ति' इति। तथा च दाय-ददातिशब्दयोर्गौणत्वोपन्यासानर्थक्यं सर्वथा अवयवराहित्ये निरूढत्वं न च यौगिकम्, तत्र मृतादीनां त्यागाभावात्। यदि त्यागो भवेत् तर्हि पितुर्मरणानन्तरं च कोऽपि धनं ग्रहीतुं समर्थो स्यात्। अतः दायशब्दः विभाजनीये पैतृकधने रूढः।

अस्मिन् संसारे सर्वे जना एकत्र स्थातुं न समर्था भवन्ति, मतपार्थक्यादिदर्शनात्। तथाहि तत्र विभागस्यावश्यकता दरीदृश्यते। विभागशब्दस्यार्थो हि विशेषेण भजनं स्वत्त्वज्ञापनं वा विभागः। कात्यायनेनापि तदेव प्रतिपादितम्-

"सकलं द्रव्यजातं यद्भागैर्गृह्णन्ति तत्समैः।
पितरो भ्रातरश्चैव विभागो धर्म उच्यते॥"[४] इति।

साधारणतया दायशब्दस्यार्थो हि यद्धनं स्वामिसम्बन्धादेव निमित्तादन्यस्य सम्भवति तदुच्यते दायपदेन। अत्रेदं वक्तव्यं यत् दायभागशब्दस्य द्विधा व्युत्पत्तिर्दृश्यते- दायस्य भागः दायभागः, अपरा च दायेन सह भागः दायभागः। यदि दायस्य भागः दायभागः इति स्यात्, तर्हि दायरूपेण संस्थितस्य दासीगवादिरूपस्य द्रव्यस्य विनाशापत्तिर्भवेत्। अतः दायस्य भाग इति न समीचीनम्। दायेन सह भागः दायभागः इत्यपि न समीचीनम्। यतः पैतृकधनेन सह वर्तमनेऽपि कश्चन न ममेदं धनं भ्रातुरिदमिति प्रयोगोऽवलोक्यते। अतः वक्तुं शक्यते यत् दायशब्दः न यौगिकः, अपि तु रूढ एव। तदुक्तं नारदेन-

"विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते।
दायभाग इति प्रोक्तं तद्विवादपदं बुधैः॥"[५] इति।

यद्भवतु नाम अथ अस्माकं मूलविषयो हि दायभागस्य प्रासङ्गिकता अस्मिन् समाजे। वस्तुतः प्राचीनकाले भारतीया हिन्दवः धर्मशास्त्रानुसारेण परिचलन्ति स्म। परन्तु कालक्रमेण समाजस्य परिवर्तनानुसारं मनुष्यस्य मनसि अपि परिवर्तनं जातम्, तदर्थञ्च विधानेषु बहु परिवर्तनं कृतम्। तत्र भारतीयधार्मिकदायाधिकारव्यवस्थां वंशानुक्रमिकपरम्पराञ्च परित्यज्य पाश्चात्यपरम्परामनुसर्तुं प्रवर्तन्ते। यथा 'Hindu Succession Act' इति नूतनविधिः प्रचलितः भारतसर्वकारेण। फलतः समाजे नैकानि परिवर्तनानि भूतानि, येन नैका समस्याः दृश्यन्ते। तस्याः समस्यायाः समाधनं धर्मशास्त्रनिरूपितदायभागे वर्तते स्म। इदानीं क्रमानुसारं तासां समस्यानां समाधानमालोच्यते मया-

प्रथमतः, प्राचीनकाले धर्मशास्त्रानुसारं पितुर्मरणात्परं तस्य धनं दायाधिकारसूत्रेण अधिकं धनं ज्येष्ठपुत्रः गृह्णाति स्म, यतः पित्रभावात् स एव परिवारस्य दायित्वं पिता इव मुख्यत्वेन पालयति-

"ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनमशेषतः।
शेषास्तमुपजीवेयुः यथैव पितरं तथा॥"[६] इति।

परन्तु यदि ज्येष्ठपुत्रः अन्यपुत्रान् प्रवञ्चयन्ति, तर्हि परिवारमध्ये कलहो जायते। तदर्थं धर्मशास्त्रीयदायाधिकारव्यवस्था अधुना विलुप्ता जाता। अपि च 'Hindu Succession Act' इत्यनुसारं सर्वे (माता, पुत्राः कन्याश्च) मिलित्वा पितृधनं समं विभज्य गृह्णन्ति- "The

surviving sons and daughters and the mother of the intestate shall each take one share.'' इति। परन्तु अस्मिन् न्याये दोषोऽस्ति। यतः पितुर्मरणात्परमुत्तराधिकारिरूपेण सर्वे समांशं नेष्यन्ति, तथाहि ज्येष्ठपुत्रोऽपि तस्यांशं नीत्वा स्वचिन्तां करोति, न तु अन्येषाम्। फलतः संसारे संहतिः अवलुप्ता भवति। यद्यपि इयमवस्था सर्वत्र न दृश्यते, तथापि अधिकतया प्राप्यते।

द्वितीयतः, धर्मशास्त्रीयविध्यनुसारं कन्या विवाहानन्तरं तस्याः पितुः सम्पत्तौ उत्तराधिकारित्वं नैव प्राप्नुवती। परन्तु वर्तमानकाले इयं व्यवस्था लुप्ता जाता। वस्तुतः अर्वाचीनहिन्दुविधौ(२००५) कन्या प्रथमश्रेणीकरिक्थिनां मध्ये अन्तर्भुक्ता जाता। फलतः क) जन्मना एव कन्या पुत्र इव स्वाधिकारेण समभागिनी भवति, ख) तस्याः यदि पुत्रोऽस्ति सोऽपि पितृधने अंशी भवति, ग) पितुरंशे तस्यापि पुत्र इव समप्रवणता भवेत् इति। अतः अनेन विधिना समांशत्वेन उभयोरपि समदायित्वं विद्यते, तेन पुत्रकन्ययोर्मध्ये अभेदः परिलक्ष्यते। परन्तु वास्तवे तन्न भवति। तत्र दृश्यते पितुः धनप्राप्त्यर्थं उभयोर्मध्ये मनोमालिन्यं दृश्यते। यतः अत्र विध्यनुसारेण कन्या लाभवती भवति। सा कन्या किमपि दायित्वं न नेष्यति। यथा कश्चन पिता यदि ऋणं कृत्वा म्रियते, तर्हि तदृणं परिशोधयेत् पुत्रः। तदा कन्या ऋणस्य किमपि उत्तरदायित्वं न नयति। फलतः भ्रातृभगिन्योर्मध्ये पवित्रसम्बन्धः विनष्टो भवति।

तृतीयतः, धर्मशास्त्रे सर्वैः स्मार्तैः धनान्तरापेक्षया स्त्रीधनविषये विचारः कृतः विस्तरेण। तत्र स्त्रीधनं न्यूनातिन्यूनं षड्विधमित्युक्तं भगवता मनुना-

"अध्यग्न्यध्यवाहनिकं दत्तञ्च प्रीतिकर्मणि।

भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम्॥"[७] इति।

वस्तुतः आधुनिकहिन्दुमते यस्मिन् धने केवलं स्त्रिया एव स्वाम्यं तदेव धनं स्त्रीधनम्। तद्धनं मुख्यतः त्रिषु अवस्थासु प्राप्यते। यथा अविवाहितावस्थायां पितृमातृकुलाद् यल्लभ्यते, वागदतावस्थायामुपहाररूपेण यत्प्राप्यते। विवाहकाले भर्तृगृहगमनावस्थायाम् स्वजनानां पक्षतश्च यद्धनं प्राप्तिर्भवति तत्सर्वं स्त्रीधनमिति। एतासु त्रिषु अवस्थासु 'प्रीभि-काउनसिल्' इत्यनेन प्राप्तं स्त्रीधनमपि एकादशविधं भवति- पितृदत्तं, मातृदत्तं, भ्रातृदत्तं. भर्तृदत्तं, भर्तृकुलाल्लब्धं, अग्न्युपागतम्, अध्यावाहनिकम्, आधिवेदनिकमन्वाधेयं, पादवन्दनादिकं, शुल्कं, पुत्रदत्तमिति। एतेषु स्त्रीधनेषु स्त्रियाः सम्पूर्णाधिकारो विद्यते। परन्तु १९५६ ख्रीष्टाब्दात्प्राक् उत्तराधिकारसूत्रेण लब्धे धने तस्याः सम्पूर्णाधिकारो नास्ति। वस्तुतः चतुर्दशधाराबलेन अधिकारोऽयं प्राप्तः-

Property of a female Hindu to be her absolute property.—

1) Any property possessed by a female Hindu, whether acquired before or after the commencement of this Act, shall be held by her as full owner thereof and not as a limited owner. Explanation.—In this sub-section, "property" includes both movable and immovable property acquired by a female Hindu by inheritance or devise, or at a partition, or in lieu of maintenance or arrears of maintenance, or by gift from any person, whether a relative or not, before, at or after her marriage, or by her own skill or exertion, or by purchase or by prescription, or in any other manner whatsoever, and also any such property held by her as STRIDHANA immediately before the commencement of this Act.

2) Nothing contained in sub-section (1) shall apply to any property acquired by way of gift or under a will or any other instrument or under a decree or order of a civil court or under an award where the terms of the gift, will or other instrument or the decree, order or award prescribe a restricted estate in such property.

परन्तु प्राक्काले पत्युर्मरणात्परं विधवापत्नीरूपेण जीवनधारणार्थं केवलं ग्रासाच्छादनं प्राप्तवतीति तु मन्मते नोचितं कर्म। यतः इयं व्यवस्था पुरुषतान्त्रिकसमाजस्य निदर्शनम्। तथाहि आधुनिकविध्यनुसारं सा विधवापत्नी पत्युर्धनस्य सम्पूर्णरूपेण दायाधिकारिणी भवति। किञ्च सा विधवापत्नी तस्या इच्छानुसारं वैवाहिकसम्बन्धः स्थापयतीत्यत्रैव ममापत्तिरस्ति। यतः यदि तस्या विधवायाः कश्चित्सन्तानः अस्ति तर्हि तस्यावस्था कीदृशी भवति तत्तु समाजे दरीदृश्यते। इदानीं कोऽपि एवं वदति यत् तर्हि किं तस्या विधवाया भविष्यत् नास्तीति आशंकायामुच्यते यस्य माता नास्ति तं निकषा जगत् तम इव। अस्मिन् विषये जगज्जननी सारदादेवी आह- "यस्य माता नास्ति स एव केवलं दरिद्रवान्" इति वचनानुसारं वक्तुं शक्यते सन्तानाय मातुरुत्तमं चिन्तनं करणीयम्।

चतुर्थतः, यद्यपि पैतृकधनस्योपरि दायादानामधिकारो वर्तते, तथापि तेषु केचिदयोग्या विद्यन्ते। ते तु क्लीवादयः, ते रिक्थभाजो न भवन्ति। तदुक्तं योगीश्वरयाज्ञवल्क्येन-

"क्लीवोऽन्धपतितस्तज्जः पंगुरुन्मत्तको जडः।
अन्धोऽचिकित्स्यरोगाद्या भर्तव्या स्युः निरंशकाः॥"[8] इति।

अतः क्लीव-पतित-पतितोत्पन्न-पंगु-उन्मत्त-जड-अन्ध-

अचिकित्सनीयव्याधिपीडितादीनामंशभाक्त्वं नास्ति। भगवता मनुनापि भणितम्-

"अनंशौ क्लीवपतितौ जात्यन्ध-बधिरौ तथा।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः॥"[१]

इति वचनात् वक्तुं शक्यते यद्यपि एते क्लीवादयो न भवन्ति अंशभाजः तथापि ग्रासाच्छादनादिकं सर्वथा विहितम्। परन्तु अर्वाचीनहिन्दुविधौ एतेषामधिकारो वर्तते पितृधने- No person shall be disqualified from succeeding any property on the ground of any disease defect or deformity, or save as provided in this Act on any other ground whatsoever. अतः उत्तराधिकारसूत्रेण ते सम्पत्तिग्रहणे योग्या एव। फलतः पूर्वस्मिन् काले तेषां कृते परिवारे यः स्नेहः आसीत् इदानीन्तु स विलुप्तप्रायः।

पञ्चमतः, प्राचीनदायाधिकारव्यवस्थानुसारं यदि कश्चन ब्राह्मणः ब्राह्मण-क्षत्रिय-वैश्य-शूद्रवर्णेभ्यः चतस्रः भार्या गृह्णाति, ताभ्यश्च ये पुत्रा जायन्ते तर्हि ते वर्णानुक्रमेण उत्तराधिकारिधनं प्राप्नुवन्ति। परन्तु अर्वाचीनहिन्दुविधौ ते पुत्रा इदानीं वर्णानुसारं धनं न गृह्णन्ति, ते तु समांशमर्हन्ति। फलतः यद्यपि मूलवंशपरम्परायाः लोपो भवति तथापि हिन्दुसमाजे एक्यभावप्रतिष्ठा भवेत् इति अर्वाचीनविध्यनुसारम्, तत्र चत्वारः वर्णाः परस्परं समानाः।

षष्ठतः, प्राचीनधर्मशास्त्रीयविध्यनुसारं कश्चन हिन्दुपुरुषः भिन्नसम्प्रदायकन्यां वोढुं न शक्नोति, परन्तु अर्वाचीनविध्यनुसारं स कामपि सम्प्रदायकन्यां वोढुं शक्नोति, अपि च उत्तराधिकारसूत्रेण धनमपि प्राप्नोति। फलतः हिन्दुसमाजे विशृङ्खला जायते, पारिवारिकसंस्कृतिः नष्टा भवति।

सप्तमतः, प्राचीनधर्मशास्त्रीयव्यवस्थानुसारं एकस्य पुरुषस्य मरणात्परमुत्तराधिकारिरूपेण पुत्र-पौत्र-प्रपौत्रैः सह विधवापत्नी, कन्या, माता, पितामही, प्रपितामहीप्रभृतयः गृह्यन्ते, तेषाञ्चाभावे सगोत्रसपिण्डादयो धनभाजो भवन्ति। एतन्मतमर्वाचीनहिन्दुविधौ परिमार्जनं कृतम्। तत्र दायादानां श्रेणीद्वयं कृतम्- प्रथमश्रेणीदायादाः(पुत्रः, कन्या, विधवापत्नी, माता, पौत्रः, पौत्री, दौहित्रः. दौहित्री, विधवापुत्रवधूः, प्रपौत्रः, प्रपौत्री, विधवापौत्रवधूः), तेषञ्चाभावे द्वितीयश्रेणीदायादाः(अ) पिता आ) पौत्र्याः पुत्रः, पौत्र्याः कन्या, भ्राता, भगिनी च इ) दौहित्रस्य पुत्रः, दौहित्रस्य कन्या, दौहित्र्याः पुत्रः, दौहित्र्याः कन्या च ई) भ्रातृपुत्रः, भगिनीपुत्रः, भ्रातृकन्या, भगिनीकन्या च उ) पितामहः, पितामही ऊ) विमाता, भ्रातुः विधवा पत्नी ऋ) पितृव्यः, पितृष्वसा ळ) मातामहः, मातामही ए) मातुलः, मातृष्वसा) इति। अष्टमतः, प्राचीनधर्मशास्त्रानुसारं अपुत्रधनस्य सम्बन्धिनामभावे तद्धनं राजा गृह्णाति, तद्वत्तु सम्प्रति सर्वकार हि गृह्णातीति शम्।

तथ्यसूत्राणि-

१) का. स्मृ.- २६
२) या. स्मृ.- २.५
३) मनु. स्मृ.- ८.४-७
४) का.स्मृतिः- ७१.१(८३८)
५) ना. स्मृ.- १३.१
६) मनु. स्मृ.- ९.१०५
७) तदेव- ९.१९४
८) या. स्मृ.- २.१४०
९) प्रागेव- ९.२०१

ग्रन्थपञ्जी-

जीमूतवाहन। दायभागः। सम्पा. अ. सुब्रह्मण्य शास्त्री। दिल्ली: मतिलाल वनारसी दास पावलिशार्स् प्राइभेट् लिमिटेड्, २०१५। मुद्रितम्।

दायतत्त्वविमर्शः। सम्पा. ड. यशवीर सिंह। दिल्ली: अभिषेक प्रकाशन, २००९। मुद्रितम्।

मनुः। मनुसंहिता। अनु. गिरिजाप्रसाद द्विवेदी। लखनौ: नवल किशोर विद्यालय, १९१५(प्रथमसंस्करण)।

स्मृतिनिरुपिता दायभागव्यवस्था। सम्पा. डा हिमांशुशेखर त्रिपाठी। वाराणसी: मनीष प्रकाशन्, २०१५। मुद्रितम्।

हिन्दुविधि। सम्पा. प्र. गिरिजाशंकर मिश्र। लखनौ: हिन्दी समिति, १९७०(प्रथम संस्करण)।

याज्ञवल्क्यः। याज्ञवल्क्यसंहिता। सम्पा. जास्टिस् एस्. एस्. सेट्लार। तिरुपति: राष्ट्रीय संस्कृत संस्थान्,२००७। मुद्रितम् Hindu Succession Act 1956. India. Print.